चिंल्लयम्, चिल्लयम्, चिचिल्लिष्यम्, चेचिल्लयम्;

ईषच्चिल्लः-दुश्चिल्लः-सुचिल्लः; — — —

चिल्ल्यमानः, चिल्ल्यमानः, चिचिल्लिष्यमाणः, चेचिल्ल्यमानः;

चिल्लः, चिल्लः, चिचिल्लिषः, चेचिल्लः;

चिल्लितुम्, चिल्लयितुम्, चिचिल्लिषितुम्, चेचिल्लितुम्;

[1]चिल्ला, चिल्लना, चिचिल्लिषा, चेचिल्ला;

चिल्लनम्, चिल्लनम्, चिचिल्लिषणम्, चेचिल्लनम्;

चिल्लित्वा, चिल्लयित्वा, चिचिल्लिषित्वा, चेचिल्लित्वा;

विचिल्ल्य, प्रचिल्ल्य, प्रचिचिल्लिष्य, प्रचेचिल्ल्य;

चिल्लम् २, चिल्लित्वा २, } चिल्लम् २, चिल्लयित्वा २, } चिचिल्लिषम् २, चिचिल्लिषित्वा २, } चेचिल्लम् २; चेचिल्लित्वा २. }

## (529) " चीक आमर्षणे "

(X-चुरादिः-1828. सक. सेट्. उभ.) आधृषीयः।

चीककः-किका, चिचीकयिषकः-षिका, [2]चीककः-किका, चिचीकिषकः-षिका, चेचीककः-किका;

चीकयिता-त्री, चिचीकयिषिता-त्री, चीकिता-त्री, चिचीकिषिता-त्री, चेचीकिता-त्री;

चीकयन्-न्ती, चिचीकयिषन्-न्ती, चीकन्-न्ती, चिचीकिषन्-न्ती; —

चीकयिष्यन्-न्ती-ती, चिचीकयिषिष्यन्-न्ती-ती, चीकिष्यन्-न्ती-ती, चिचीकिषिष्यन्-न्ती-ती;

चीकयमानः, चिचीकयिषमाणः, — चेचीकयमानः;

चीकयिष्यमाणः, चिचीकयिषिष्यमाणः, चेचीकिष्यमाणः;

चीक् – चीकौ – चीकः; — —

चीकितम्-तः, चिचीकयिषितम्-तः, चीकितम्-तः, चिचीकिषितः, चेचीकितः-तवान्;

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः।
2. 'आधृषाद्वा' (ग. सू. चुरादौ) इति णिचो वैकल्पिकत्वात्, शुद्ध-सन्नन्त-यङन्तेषु रूपाणि प्रदर्शितानि।

A. 'क्राथ्यं प्रोथितवान् अशीकितमर्तिं भूमावचीकन् अमुम्।' धा. का. 3.50.